# १. श्रीगणपतिस्मरणम्

**(शुभ कार्याच्या प्रारंभी म्हटल्यास सर्व कार्य यशस्वी होते. युध्दात जय मिळतो, विघ्ने टळतात. ७ वा व ८ वा श्लोक म्हटल्यास व्यासांची कृपा होते.)**

वक्रतुण्ड महाकाय सूर्यकोटीसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।

स जयति सिंधुरवदनो देवो यत्पादपंकजस्मरणम् ।
वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम् ।।

सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिप ।१।

धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् शृणुयादपि ।।२।।

विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ।।३।।

शुक्लांबरधरं देव शशिवर्ण चतुर्भुजम ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये ।।४।।
नमस्तस्मै गणेशाय ब्रह्मविद्याप्रदायिने ।
यस्यागस्त्यायते नाम विघ्नसागरशोषणे ।।५।।

यत्रामग्रहणादेवा अपि मंगलमाप्नुवन् ।
ऋध्दिसिध्दयोः प्रदातारम् तं नमामि गजाननम् ।। ६।।